विष्णुस्तुतिः

बहुदुःखभरोदर्कस्तमसोग्रतमोऽधमः ।
नरको नरको वा तं मतिमानतिवर्तते ॥ १॥

नरकान्तकपादाब्जपरिचर्यापरान्नरान् ।
विना विनायकाद्यर्चापरोऽप्युच्चतरोऽरितः ॥ २॥

पतेत्तत्र न तत्राणं कुर्युस्ते पर्युपासिताः ।
पश्य दृश्य पदद्वन्द्वस्यार्थं न व्यर्थधीर्भव ॥ ३॥

असुरो हि सुरक्लेशकरो नरकनामकः ।
तस्य हन्ता सतां चिन्तासन्तापाद्यन्तकृन्न किम् ॥ ४॥

विशेषेण घ्नन्ति कार्यं विघ्नास्तेषामधीश्वरः ।
आरब्धशुभकार्याणां विरुद्धस्य हि नायकः ॥ ५॥

अजामिलो द्विजः पूर्वमतिचक्राम केन तान् ।
ससुराः कस्य भजकाः कुतो वा तत्र चक्रमुः ॥ ६॥

इति चिन्तय तेनापि सन्देहं छिन्धि मन्द ते ।
गङ्गासेतू पापभङ्गकरौ कोऽकुरुत प्रभुः ॥ ७॥

हयाननस्य वाक्छिष्यो नाभिपुत्रः पदार्चकः ।
गुरुर्हि तस्य भ्रूभङ्गः शिवाय स्यात्सतां सदा ॥ ८॥

वादिराजयतिप्रोक्तं स्तोत्रमेतत्पठन्सदा ।
वादे विजयमाप्नोति नाधोओ याति कदाचन ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

विष्णुस्तुतिः सम्पूर्णा

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु